International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 343-345
© 2026 IJMH
www.themultijournal.com

Received: 02-04-2026
Accepted: 24-04-2026
Publish : 25-04-2026

**डा. देवाशिषत्रिपाठी**
सहायकाचार्यः, साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

**Correspondence:**
**डा. देवाशिषत्रिपाठी**
सहायकाचार्यः, साहित्यविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी, ओडिशा

# रसचेतनाविमर्शः

**डा. देवाशिषत्रिपाठी**

काव्यपठनेन श्रवणेनाथचाभिनयदर्शनेन च यादृश आनन्दो भवत्यस्मादृशानां स एवानन्दो रसः इति सार्वजनीनानुभवः । तर्हि कानि साधनानि सन्ति यानि रसं निष्पादयन्तीति चेत् ? विभावानुभाव-व्यभिचारीसंयोगाद्रसनिष्पत्तिः' इति भरतसूत्रमस्ति । नाट्यशास्त्रे तेन बहुभिव्याख्यातम्। तत्र मतभेदोप्युत्पन्नः । इदमल्पाकारमप्यनेक व्याख्यानकर्तृणां तर्कमूलिकां हृदयङ्गमां सारभूतां युक्तियुक्तां व्याख्यामवलोक्यातिमहत्वाधायकमित्यामनन्ति सर्वे। रसनिष्पत्तेः सिद्धान्तस्य मूलप्रणेता, नाट्यशास्त्ररचयिता, प्रयोगकर्ता च भरतमुनिः। यद्यपि रसः ब्रह्मवत् अवाङ्मनसगोचरः "तथापि केचन सहृदयाः, सामाजिकाः भाग्यवन्तः एनमास्वादयन्ति । दृश्यकाव्ये दर्शकाः, श्रव्यकाव्ये श्रोतारः "सामाजिकाः" इति कथ्यन्ते । आलङ्कारिकाः कथयन्ति - कोऽयं रसः ? तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् । इति रस' शब्दः आनन्दवाचकः । ब्रह्मणः स्वरूपं आनन्दमयम्। " **रसो वै सः** "[1] इति श्रुतिवचनं रसशब्देनोच्यते । स आनन्दात्मकः । वैदिकसाहित्ये रसशब्दस्योल्लेखः सोमरसस्यार्थे वर्तते। रसं ह्येवायं लब्धानन्दी भवति । **"दधानः कलशे रसम्"** [2] भाव एव रसस्य वीजं मूलरूपमित्युपलब्धं भवति । तत्र कव तिवृति भावः, किं च स्वरूपमेतस्येति चेत् ? सहृदयसामाजिकानां हृदये तिष्ठत्ययं भावः । प्राक्तनजन्मनः संकारस्वरूप एव । एते एव भावाः काव्येषु वर्णितविभावादिद्वारा पुष्टीभूय रसरूपे परिणताः भवन्ति, एते च चेतनाचेतनमानस किञ्चित्कालमेकीकृत्य तन्मध्यगतां यवनिकामपहृत्य अस्मद् हृदयस्य तच्चरमसोपानसीमापर्यन्तं प्रापयन्ति यत्र वयं मनोराज्ये विचरण कुर्मः, तत्र केवलानन्द एवानन्दो वर्तते । अयमानन्द : 'रस' संज्ञया व्यपदिश्यते । लौकिक सन्नप्यलौकिक एवायम् । वेदान्तदिशा दिव्यरूपो ब्रह्मास्वादसहोदरः कथ्यते । के सहृदयाः ? येषां काव्यानुशीलन अभ्यासद्वारा विशदीभूते मनोदर्पणे तन्मयीभवनयोग्यता ते स्वहृदयसंवादभाजः सहृदयाः ।

निवृत्तिमार्गानुयायीनां यथा ब्रहमानन्दप्राप्तिसम्भवन्ति तथा न प्रवृत्तिमार्गीनुयायिनाम्। सांसारिक-प्रवृत्तिसम्पन्नानां सर्वोत्कृष्ट आनन्दं काव्यानन्दमेव भवति । तदेव रसशब्दवाच्योऽस्ति । इदमेव काव्यजीवातुतत्त्वमस्ति । रसे न शब्दवाच्यः काव्यानन्दस्वरूपं निरूप्यमाणः आचार्य अभिनवगुप्तः वक्ति यत्- साकार इवाभिन्नोऽपि गोचरीकृतः चर्ममाणतैकप्राणै विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः, पुर इव परिस्फुरन्, सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत्, ब्रस्मास्वादमि-वानुभावचन अलौकिकचमत्कारकारी शृङ्गारादिको रसः ।"[3]

मुनेः रससूत्रोपरि व्याख्या नैके टीकाकाराः नैकरूपतया कृताः तेषु भट्टलोल्लट शङ्कुकः भट्टनायकः अभिनवगुप्तः प्रधानाः सान्ति । अभिनवगुप्तपादः मुख्यः व्याख्याकारी भवति । एतेषां चतुर्णाम् आचार्याणां व्याख्याः अभिनवगुप्तेन भरतनाट्यशास्त्रस्य 'अभिनवभारती" नाम्नी टीकायां कृताः। अस्यां टीकायां व्याख्यानप्रकरणं दीर्घतरमस्ति । आचार्य मम्मटः अस्य सारांशः काव्यप्रकाशे प्रकाशितवान्। विभावैललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृ-तिभिः कार्ये प्रतीतियोग्यः कृतः, व्यभिचारिभिनिर्वेदादिभिः, सहकारिभिरुपचितो मुख्यया वृत्त्या

रामादावनुकार्ये तद्रूपतानुसन्धान्नत्तकेऽपि प्रतीपमानो रस इति भट्टलोल्लटप्रभृतयः।" मतमिदं मीमांसासिद्धान्तानुरुपम् वर्तते। मीमांसा नाम उत्तरमीमांसा अर्थात् वेदान्तस्य ग्रहणम् । यथा रज्जुसर्पज्ञानम् रज्जु इत्यस्य दर्शने अविद्यमानो सर्पप्रतीतिः तस्मात् भयादि कार्योत्पत्तिर्जायते यथा । तथैव रामादिगता सीताविषयिणी अनुरागादिरूपा रतेः अविद्यमानेऽपि नटे विद्यमानत्वात् तत्प्रतीतिरस्ति । तस्मात् सहृदयेषु चमत्कारानुभूतिः उत्पद्यते । अस्य व्याख्याकारः भट्टलोल्लटः मीमांसकः । राम एवायम् अयमेव राम इति, न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति, रामः स्याद्वा न वाऽयमिति, रामसहयोऽयमिति, च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे तत् प्रतीतिः ।

**सेयं ममाङ्गेषु सुधारसच्छटा सुपुरकर्पूरशलाकिका दृशैः।**
**मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं मताः ।।**[4]
(का. प्र.)

**दैवादमह्य तया चपलायतनेत्रया वियुक्तश्च ।**
**अविरलविलोलजलदः कालः समुपागतश्चायम् ॥**[5]

इत्यादिकाव्यानुसंधानबलानिच्छक्षाभ्यासनिवर्तिस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथाऽनभिमन्यमानै-विभावादिशब्दव्यपदेश्यैः संयोगात् गम्यगमक भावरूपात, अनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिर्भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः। अस्य नैयायिकस्य मते निष्पत्ति शब्दस्यार्थः अनुमितिः एवञ्च संयोगशब्दस्यार्थः गम्य-गमकभावसम्बधः वर्त्तते। श्रीशङुकस्य मतमुपरि आचार्य अभिनवगुप्तः कथयति अनुमित्या सामाजिकेषु रसप्रतीतिः न पर्याप्तरूपेण सम्भवति। अस्मिन् प्रक्रियायां नटे कृत्रिम राम-सीताविषयकरतिः अनुमीयते परन्तु सामाजिकानां रसानुभूतिः न पर्याप्तरूपाऽस्ति ।

**भट्टनायकस्य भुक्तिवाद :** न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते अपितु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणान्मना भावकत्वव्यापारेण भाव्यमानः स्थायी, सत्वोन्द्रेकप्रकाशानन्दमयसंविनिश्रान्तिसतत्वेन भोगेन भुज्यते' इति भट्टनायकः । भट्टनायकस्य भुक्तिवादः सांख्यमतानुयायी सिद्धान्तः मन्यते । सांख्यमतानुसारं सुखदुःखादयः अन्तःकरणस्य धर्मः भवति न तु आत्मनः धर्मः, परन्तु पुरुषस्य अन्तः करणेन साकं सम्बन्धे पुरुषे तस्य औपाधिकप्रतीतिः भवति। तथैव सामाजिकेषु अलौकिकरसस्य भोगः भवति। सादृश्याधारेण अयं सिद्धान्तः साख्यसिद्धान्त इति कथयितुं शक्यते। भट्टनायकस्य मतनुपरि आचार्यः निगदति यत् - शब्दे भावकत्व - भोजकत्व द्वयोः ब्यापरयोः नवीनकल्पनया न ग्रहणीयौ भवतः नानुभवसिधौ च। स्थायीभावस्य भोगरिति कथनेन कस्य ग्रहणं नाटगतं सामाजिकगतं वा इति न स्पष्टमस्ति। अतः विद्वांसः भुक्तिवादं न पूर्णतया स्वीकृतवन्तः । एवमतम्- लोके प्रमदादिभिः स्थाप्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैख कारणत्वारिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यावहार्यैर्ममैवैते, रात्रौरेवैते, तटस्थस्यैवैते, न ममेवैते, न शात्रोरेवैते, न तटस्थस्यैवैते, इति सम्बन्धविशेषस्वीकारपरिहारनियमानध्यवसायान् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमित - प्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृत श्चर्य्यमाणतैकप्राणः, विभावादिजीविताविधिः, पानकरसन्यामेन चर्व्यमाणः पुर इव परिस्फुरन्, हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वमिव तिशेदधत्, ब्रह्मास्वादमियानुभावयन्, अलौकिकचमत्कारकारी श्रृङ्गारादिको रसः । अभिनवभारत्यां आचार्यगुप्तपादः रसोत्पतिविषये समधिकी चर्चा कृतः। तत्र भट्टलोल्लट-श्रीशङ्कुक-भट्टनायकादि मतानामुपरि विश्लेषणं कृता स्वसिद्धान्त प्रतिपादयति। तस्य समस्तविश्लेषणस्य मुख्याविन्दुः सामाजिकरसानुभूतिः अस्ति। अभिनवगुप्तपादेन रसस्य अलौकिकता विषये एवं वक्ति यंत् रसः न कार्यः। नापि ज्ञाप्यः। विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात् । सिध्दस्य तस्यासम्भवात्। अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत् ? न क्वचिद् दृष्टमित्यलौकिकत्वसिध्दभूर्षणमेतन्न दूषणम् । साहित्यदर्पणे विश्वनाथः कथयति-

**तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ।**
**प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम् ।।**[6]

अर्थात् रसस्य परोक्षत्वं निषेधति । साक्षात्कारतया नाम प्रत्यक्षात्मकतया, रसः न च परोक्षः, न च प्रत्यक्षभिन्नः, अतीन्द्रीयेति भावः । अतः तस्मात् कारणात् रसे ज्ञापत्वादिधर्माणाव प्रतिषेधात्, अनाकर्णितानावलोकित अस्य रसस्य स्वरूपं कीदृशम् इति जिज्ञासायां कथ्यते ।

चैतन्यचरितामृते-

**विभाव अनुभाव सात्विक व्यभिचारी ।**
**स्थायीभाव रस हय -एई चारि मिलि ।।**[7]( मध्य- 23)

भक्तिरसामृतसिन्धौ-

**व्यतीत्य भावनावर्त्म यश्चमत्कृतिभारभूः ।**
**हृदि सत्त्वोज्वले बाढं स्वदते स रसो मतः ॥**[8]

अयं रसः न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात् । नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात् । अतः सविकल्पकमपि न ग्राहयम्। उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववश्लोकोत्तरस्तामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः । अभिनवगुत्पादः नरसिंहगुप्तस्यात्मज आसीत्। तस्य जन्म दशमशतकस्य अन्तिमभाग तथा एकादशशतकस्य प्रारम्भवभूत । तन्त्रालोके यथा-तस्यान्ववाये महति कोऽपि वराहगुत, नामा बभूव भगवान् स्वयमन्तकाले । गीर्वाणसिन्धुलहरी कलिताग्रमूर्धा, यस्याकरोत् परमनुग्रहाग्रहेण । तस्यात्मजः चुलुखकेति जने प्रसिद्धः; चन्द्रावदातधिषणो नरसिंह गुप्तः । ये सर्वशास्त्रस्य

मज्जन शुभ्रचित्तं महिश्वरी परमलङ्करंरुते सा भक्तिः ।। अयं स्वतः विद्याव्यसनी आसीत्। नैकानां ग्रन्थानां रचयिता । भरतमुनिप्रणीत-नाट्यशास्त्रस्य व्याख्याग्रन्थः अभिनवभारती, आनन्दवर्द्धनाचार्य-धन्यालोकस्य व्याख्याग्रन्थः लोचनटीका। एतौ दौ व्याख्याग्रन्थौ। तथापि एतयोः महिमानौ अभिनवगुप्तः काव्यशास्त्रेतिहासे चिरस्मरणीयोऽस्ति । मम्मटादयः अस्य महापुरुषमनुसरन्ति ।

वैष्णवरससम्प्रदायेषु रुपगोस्वामी, विश्वनाथचक्रवर्त्तिप्रमुखाः विद्वांसः रससाक्षात्कारस्य क्रमः एवं प्रदर्शयन्ती यत् -

1 श्रवणकीर्त्तनादि भजने पुनर्पुन अभ्यासवशतः आनन्दरूपा-रतेराविर्भावः ।

2 ततः विभावादैः सह चेतसः संयोगः । चित्तसंयोगात् रतिसाक्षात्कारः ।

3. ततः रतिः रसरूपेण परिणमति ।

4. तत्परं तैर्विभावादैः साहचर्येण रससाक्षात्कारः अथवा आस्वादनं सम्भवति ।[9]

अतः सहृदयलक्षणकारः अभिनवगुप्तः ध्वन्यालोकस्य लोचन-टीकायाम् वक्ति - येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे तन्मयीभवनयोग्यता ते स्वहृदयसंवादभाजः सहृदयाः ।[10]

इति दिक्

**पाददटीकाः**

1. तैत्तरीय. उपनिषत् - 11-07-01
2. ऋग् वेदः -1/63/13
3. काव्यप्रकाशः पृ.- 109
4. तत्रैव - 4/25
5. तत्रैव - 4/26
6. साहित्यदर्पणः -3/26
7. चैतन्यचरितामृतम् - मध्य/23
8. भक्ति. - **(दक्षिणविभागः 5/132)**
9. गौडीयवैष्णवसाहित्यम् षष्ठपरिच्छेदे पृ .184
10. ध्वन्यालोकः पृ. -35

**सहायकग्रन्थसूची**


- आनन्दवर्धनः। *ध्वन्यालोकः*, अभिनवगुप्तकृत-लोचनटीकासहितः। वाराणसी: चौखम्बा संस्कृत सीरीज ऑफिस, १९४०।
- कृष्णदासकविराजगोस्वामी। *श्रीचैतन्यचरितामृतम्*। मध्यलीला।
- मम्मटाचार्यः। *काव्यप्रकाशः*। व्याख्याकारः गङ्गानाथझा। वाराणसी/नवदिल्ली: भारतीया विद्या प्रकाशन, २००५।
- रूपगोस्वामी। *भक्तिरसामृतसिन्धुः*।
- विश्वनाथकविराजः। *साहित्यदर्पणः*। सम्पादकः सत्यव्रतसिंहः। नवमसंस्करणम्। वाराणसी: चौखम्बा विद्याभवन, १९९२।
- *गौडीयवैष्णवसाहित्यम्*। षष्ठः परिच्छेदः।
- *ऋग्वेदसंहिता*, सायणाचार्यभाष्यसहिता *तैत्तिरीयोपनिषत्*।
- **भरतमुनिः**। *नाट्यशास्त्रम्*। सम्पा. रघुवंशशास्त्री। वाराणसी: चौखम्बा संस्कृत संस्थान।
- **मम्मटः**। *काव्यप्रकाशः*। सम्पा. सत्यव्रत सिंह। वाराणसी: चौखम्बा विद्याभवन।
- **धनञ्जयः**। *दशरूपकम्*। धनिककृत *अवलोक* व्याख्यासहितम्। वाराणसी: चौखम्बा संस्कृत सीरीज।
- **रामचन्द्रः** तथा गुणचन्द्रः। *नाटकचन्द्रिका* वाराणसी: चौखम्बा संस्कृत प्रतिष्ठान।